This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M706. विषय व्याकरण.

नाव. समासचक्रम् (MSS).

लेखक/लिपीकार आपा बासरकर (लिपिक).

पृष्ठ 6 काळ शके १७९० पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥ अथकाव्योपयोगिनः शब्दालिख्यंते॥ तत्र
विभक्त्यंतंपदं॥ क्रियाकारकयोजनमयः धात्वर्थक्रिया॥ अथका
कारणि॥ अथकारणि कर्ताकर्म च करणं संप्रदानं तथैव च॥ अपा
ना दानाधिकरणमित्याहुः कारकाणिषट्॥१॥ प्रथमांतः कर्ता॥ द्विती
यांतं कर्म॥ तृतीयांतं करणं॥ चतुर्थ्यंतं संप्रदानं॥ पंचम्यंत अपादा
नं॥ षष्ठ्यर्थसंबंधः॥ सप्तम्यंत अधिकरणं॥ अथविशेषणविशेष्य
भावः॥ सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु॥ वचनेषु च सर्वेषु
यन्न व्येति तत्तदव्ययं॥१॥ अथ समासः पंचविधः॥ केवलसमासः॥
अव्ययीभावः॥ तत्पुरुषः॥ द्वंद्वः॥ बहुव्रीहिश्च॥ तत्र प्रायेण पूर्वपद
प्रधानो बहुव्रीहिः अव्ययीभावः॥ उत्तरपदार्थप्रधानस्तत्पुरुषः॥ अन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ पदार्थप्रधानो बहुव्रीहिः॥ तत्पुरुषस्य भेदः कर्मधारयः॥ कर्मधारयभेदो द्वि
गुः॥ यत्र कर्त्तरि प्रथमा भवति॥ तत्र कर्मणि द्वितीया॥ यथा देवदत्तः॥ ओ
दनं पचति यत्र कर्त्तरि तृतीया भवति॥ तत्र कर्म प्रथमाविभक्तिर्बोध्या॥
यथा देवदत्तेन ओदनं पच्यते॥ अथ तिङंतरूपाणि॥ सर्वेषां धातूनां द
शलकाराः संति॥ यथा॥ लट्॥ लिट्॥ लुट्॥ लृट्॥ लेट्॥ लोट्॥ लङ्॥ लिङ्॥
लुङ्॥ लृङ्॥ एषु लेट् छंदस्येव॥ भू सत्तायां अकर्मकः परस्मैपदि वर्त्तमाने
लट्॥ भवति। भवतः। भवंति। भवसि। भवथः। भवथ॥ भवामि। भवावः। भवा
मः। भूतार्थे लिट्॥ बभूव। बभूवतुः। बभूवुः। बभूविथ। बभूवथुः। बभूव। बभू
व। बभूविव। बभूविम। भविष्यदर्थे लुट्॥ भविता। भवितारौ। भवितारः। भ ॥१२॥
विता सि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः।

एवमष्टाविंशतिप्रकाराः॥ प्रदर्श्यंते॥ तथा तत्पुरुषोष्टविधः प्रथमातत्पुरु
षो द्वितीयातत्पुरुषः तृतीयातत्पुरुषः चतुर्थीतत्पुरुषः पंचमीतत्पुरुषः
षष्ठीतत्पुरुषः सप्तमीतत्पुरुषोष्टमीतत्पुरुषश्चेति॥ तत्र प्रथमातत्पु
रुषो यथा॥ पूर्वं कायः॥ पूर्वकायः॥ अर्धं पिप्पल्याः॥ अर्धपिप्पलि॥ द्वितीया
तत्पुरुषो यथा॥ कृष्णं श्रितः॥ कृष्णश्रीतः॥ नरकं पतितो नरकपति
तः॥ स्वर्गं गतः स्वर्गगतः॥ हरिं प्राप्तः हरिप्राप्तः॥ सुखमापन्नं सुखा
पन्नं॥ तृतीयातत्पुरुषो यथा॥ शंकुलया खंडः॥ शंकुलाखंडः॥ धा
न्येनार्थो धान्यार्थः॥ हरिणा त्रातो हरित्रातः॥ व्यासेन कृतं व्यासकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥

तं॥चतुर्थीतत्पुरुषोयथा॥युपायदारुयूपदारु॥फलकायनिलाफलकनिला॥
कंचुकायपटःकंचुकपटः॥ब्राम्हणायइदंपयःब्राम्हणार्थपयाः॥कुबेरा
यबलिःकुबेरबलिः॥देवदत्तायहितंदेवदत्तहितं॥विष्णुमित्रायसुखं
विष्णुमित्रसुखं॥पंचमीतत्पुरुषोयथा॥सिंहाद्भयंसिंहभयं॥दुःखात्
५२ अपेतः॥दुःखापेतः॥षष्ठितत्पुरुषोयथा॥आंम्रस्यफलंआम्रफलं॥श्री क
यःपतिःश्रीपतिः॥जनकस्यसूताजनकसूता॥सप्तमीतत्पुरुषोयथा॥
अक्षेषुशौंडोअक्षशौंडः॥कांपिल्यांसिद्धःकांपिल्यसिद्धः॥नञ्तत्पुरु
षोयथा॥नब्राह्मणोअब्राह्मणः॥नवृषलिःअवृषलिः॥नधर्मः॥अधर्मः॥

॥२॥

कर्मधारयोसप्तधा॥विशेषणपूर्वपदोविशेष्येणापूर्वपदोविशेषणोभयपदोउ
पमाउपमापूर्वपदः॥उपमानोत्तरपदः॥संभावनापूर्वपदोअवधारनेपू
र्वपदश्चेति॥तत्रविशेषणपूर्वपदोयथा॥कृष्णश्चासौसर्पश्चकृष्णस
र्पः॥रक्ताचासौलताचरक्तलता॥नीलंचतत्उत्पलंचनीलोत्पलं॥विशे
ष्यपूर्वपदोयथा॥सितंचतत्उष्णंचसितोष्णं॥श्वेतश्चासौरक्तश्चश्वे
तरक्तः॥तन्वीचसादीर्घाचतनुदीर्घा॥उपमानपूर्वपदोयथा॥मेघइ
वश्यामोमेघश्यामः॥लतेवतन्वीलतातन्वी॥कमलमिवमंजुलंकम
लमंजुलं॥उपमानोत्तरपदोयथा॥सिंहइववनरःनरसिंहः॥संभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥

वनपूर्वपदोयथा॥रामइतिचंद्रोरामचंद्रः॥अंधारनपूर्वपदोयथा॥धर्मएव
धनंधर्मघनं॥विद्येएवधनंविद्याधनं॥बहुव्रीहिःसप्तधा॥द्विपदोबहुप
दःसहपूर्वपदःसंख्योत्तरपदोव्यतिहारलक्षणोदिगंतरालक्षण
श्चेति॥तत्रद्विपदःषड्विधः॥द्वितियाबहुव्रीहीः॥तृतियाबहुव्रीहिः॥
चतुर्थबहुव्रीहिः॥पंचमीबहुव्रीहीश्चेति॥तत्रद्वितियाबहुव्रिहिः
यथा॥आरूढोवानरोयेसः॥आरूढवानरोवृक्षः॥तृतीयाबहुव्रीहि
र्यथा॥जितःकामोयेनसः जितकामः॥जितारंभायययासाजितरंभा॥
चतुर्थिबहुव्रीहिर्यथा॥उपहृतःपशुर्यस्मैसःउपहृतपशुः॥पंचमिबहुव्री

हिर्यथा॥उद्धृतःओदनोस्यास्याउद्धृतवोदनास्थालि॥षष्ठिबहुव्रीहिर्यथा॥
पीतंअंबरंयस्यसःपीतांबरः॥चित्राःगावोयस्यसःचित्रगुः॥सप्तमिब
हुव्रिहिर्यथा॥समृद्धाःवृक्षाःयस्मिंतत्तसमृद्धवृक्षं॥बहुपदोयथा॥स
र्वलोकःप्रियोयस्यसःसर्वलोकप्रियः॥निर्मलामहतीगीर्यस्यसःनिर्म
लमहद्गीः॥सहपूर्वपदोयथा॥सहभार्ययावर्ततेइतिसभार्यः॥सह
पुत्रः॥सहमूलं॥सहपुत्रेणवर्ततइतिसहपुत्रः॥सहमूलेनवर्ततेइति
सहमूलं॥संख्योत्तरपदोयथा॥उपगतादशाएषांतेउपदशाः॥त्रि
सन्नाविंशतिर्येषांतानित्र्यधिकत्रिंशानि॥संख्याभयपदोयथा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वौवात्रयोवामानंयेषांतेत्रिचतुरः॥व्यतिहारलक्षणोयथा॥केशेषुके
शेषुगृहित्वेदंयुद्धंप्रवर्त्ततेइतिकेशाकेशी॥दंडेदंडेगृहित्वेदंयुद्धंप्रव
र्त्ततेइतिदंडादंडि॥एवंमुष्टामुष्टि॥कचाकचि॥बहवोबाहवि॥इत्या
दि॥दिगंतराललक्षणोयथा॥दक्षिणस्याश्चपूर्वस्याश्चदिशोयदंतरा
लंसादक्षिणपूर्वादिक्॥संख्यापूर्वोद्विगुः॥द्विगुर्द्विविधः॥एकवद्भा
वीअनेकवद्भावीचेति॥एकवद्भावियथा॥पंचानांवटानांसमाहारःपं
चवटि॥पंचानांफलानांसमाहारःपंचफलि॥एवंत्रिलोकिचतुर्गुणि
इत्यादि॥त्रयाणांभुवनानांसमाहारःत्रिभुवनं॥एवंपंचपात्रं॥पा

त्रादिषुङिःपृ॥नभवतिनपुंसकश्च॥चतुर्युगं॥अनेकवद्भावियथा॥स
प्तऋषयः॥चतस्रोदिशः॥चतुर्दिशः॥त्रयोलोकाः॥त्रिलोकः॥द्वंद्वोद्विवि
धः॥इतरेतरद्वंद्वः॥समाहारद्वंद्वश्चेति॥इतरेतरद्वंद्वोयथा॥रामश्च
लक्ष्मणश्चरामलक्ष्मणौ॥राधाचमाधवश्चराधामाधवौ॥लक्ष्मि
श्चगौरिचलक्ष्मिगौर्यौ॥कुलंचस्थानंचकुलस्थाने॥क्वचित्तविशेषो
स्ति॥अश्वश्चवडवाश्चअश्ववडवौ॥ब्राह्मणश्चब्राह्मणीचब्राह्म
णौ॥भ्राताचस्वसाचभ्रातरौ॥पुत्रश्चदुहिताचपुत्रौ॥जायाश्चपति
श्चदंपति॥जंपति॥जायापति॥शिवश्चशिवाचशिवौ॥पिताचमाताच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ ॥५॥

पितरौ॥माता पितरौ॥श्वशुरश्च श्वश्रुश्च श्वशुरौ॥श्वश्रु श्वशुरौ॥स्त्रिश्च पुमां
श्च स्त्रीपुंसौ॥हरिश्च हरश्च गुरुश्च हरिहर गुरवः॥समाहारद्वंद्वो यथा॥
दंताश्च ओष्टाश्च समाहृताः॥दंतोष्टं॥मौरजिकश्च मानविकाश्च मौर
जिकमानविकं॥रथिकाश्च अश्वारोहाश्च समाहृताः रथिकाश्वरोहं॥अ
व्ययीभावो द्विविधः॥नामपूर्वपदः॥अव्ययपूर्वपदश्चेति॥तत्र नामपू
र्वपदो यथा॥सूपस्य मात्रा सूपप्रति॥घृतस्य मात्रा घृतंप्रति॥मंत्राणां
समृद्धिः॥मंत्रसमृद्धिः॥मक्षिकाणाम भावो निर्मक्षिकं॥अव्ययपूर्वप
दो यथा॥मक्षिकाणामद्रो यथा॥कुंभस्य समिपे उपकुंभं॥फलंप्रतिती

३सो

प्रतिफलं॥पुनः समासश्चतुर्विधः॥नित्य समासः॥अनित्य समासः॥लुक्समा
सः॥अलुक्समासश्चेति॥तत्र नित्य समासो यथा॥कुंभं करोतीति कुंभकारः॥
अनित्य समासो यथा॥वृक्षस्य मूलं वृक्षमूलं॥लुक्समासो यथा॥वर्तुलौ कु
चौ यस्या सा वर्तुलकुचा॥अलुक्समासो यथा॥कंठे कालो यस्य सः कंठे
कालः॥वनेचरतीति वनेचरः॥स्तोकान्मुक्तः॥कृछ्रान्मुक्तः॥आत्मनः॥प्र
कृत्याचातरः॥आत्मनेपदं॥परस्मैपदं॥युधिष्ठिरः॥त्वचिसारः॥दिविस्
पृक्॥हृदिस्पृक् स्तंभेरमः॥कर्णेजपः॥पश्यतोहरः॥वचोयुक्तिः॥इत्यादि
समासः॥दिङ्मात्रेण प्रतिपादिताः॥समासाः॥चक्रसमासः॥इति समा
स चक्र समाप्त॥ हे पोथि धर्मात्कारिकाशिनाथ भटाचि हो य सत्य शके १७०९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इतिसमासचक्रंसमाप्तं॥हस्ताक्षर॥
॥बासरकरकृष्णआपाचेहोय॥छ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.08.19 13:04
,TRANSFERRED=2019/08/28 at 13:08:44
,PAGES=8
,TYPE=STD
,NAME=S0001584
,Book Name=M-706-SAMAS CHAKRAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection